श्रीः

# ॥ श्रीमत्-काञ्चीकामकोटि-सर्वज्ञपीठाधीश्वर-पूजापद्धतिः ॥







# ॥ प्रस्तावना ॥

अस्माकं श्रीकाञ्चीकामकोटिपीठे श्रीशङ्करभगवत्पादप्रभृति अद्यपर्यन्तं ७० आचार्याः संसारे कान्दिशीकतया तप्यमानान् नः कृपावृष्टिभिः सेचयन्तो मेघायमानाः भान्ति ।

श्रीभगवत्पादाः काञ्चीपुरे श्रीचक्रप्रतिष्ठां कृत्वा, अम्बां कामाक्षीं शमयित्वा, सर्वज्ञपीठम् आरोहन् । तस्मिन् समये देव्या शारदया अनुगृहीताम् आज्ञां पुरस्कृत्य तस्याः नाम्ना अत्र शारदामठं संस्थाप्य, स्वयं प्रथमपीठाधिपतित्वे भूत्वा, अत्रैव कामाक्ष्याम् ऐक्यं प्राप्ताः ते इति अस्य पीठस्य वैशिष्ट्यम् ।

अस्य पीठस्य आचार्याः सर्वेऽपि स्वे स्वे काले विद्यमानां जगतः परिस्थितिम् अनुसृत्य धर्मं सुनिपुणं परिपाल्य जनान् रक्षितवन्तः इत्येतत् श्रीसदाशिवब्रह्मेन्द्रप्रभृतयः नैके महान्तः स्वीयेषु ग्रन्थेषु सुष्ठु दर्शितवन्तः सन्ति ।

तस्मात् अस्माकं कामकोट्याचार्याणां मासिकानि/वार्षिकाणि जयन्तीदिनानि आराधनादिनानि इत्येवमादिषु अवसरेषु, अपेक्षायां सत्यां नित्यमपि वा भक्तैः पूजायाम् उपयोगार्थम् एषाम् आचार्याणां सर्वेषामपि समन्वयार्हम् एकं पूजाविधानं विरचनीयम् इति अपेक्षा उत्पन्ना । अस्माकं श्रीचरणानाम् अनुग्रहेण इदं पूजाविधानं प्रवर्तमानस्य स्वस्तिश्री-विकारिसंवत्सरस्य (२०१९-२०) श्रीशङ्करजयन्तीं पुरस्कृत्य प्रकाश्यते ।

श्रीकामकोटिपीठस्य नेरूर्शङ्करमठः ।

श्रीः

# ॥ श्रीमत्-काञ्चीकामकोटि-सर्वज्ञपीठाधीश्वर-पूजापद्धतिः ॥

*

कामाक्षी-करुणा-रूपं कामकोटि-जगद्-गुरुम् ।
चिन्-मूर्तिं कलये चित्ते शङ्करा-चार्य-मव्ययम् ॥

अज्ञाना-न्तर्-गहन-पतितान् आत्म-विद्यो-पदेशैः
त्रातुं लोकान् भव-दव-शिखा-ताप-पापच्यमानान् ।
मुक्त्वा मौनं वट-विटपिनो मूलतो निष्पतन्ती
शम्भोर्-मूर्तिश्-चरति भुवने शङ्करा-चार्य-रूपा ॥

भक्ता-न्तर-तमः-सूर्यः काषाया-म्बर-सुन्दरः ।
स्मित-सौम्ये-न्दु-वदनो भस्म-भूषित-फालकः ॥
करुणा-र्द्र-कटाक्षा-ढ्यो वचनेना-भय-प्रदः ।
रुद्राक्ष-बिल्व-तुलसी-स्फटिकैर्-वृत-कन्धरः ॥
चिन्-मुद्राऽभय-हस्तेन दण्डेन च सुमण्डितः ।
उपवास-क्षाम-देहस्-तपसा तु महा-बलः ॥
मोक्ष-दान-पटीयोभ्यां पादा-ब्जाभ्यां भया-पहः ।
शिष्या-नुग्रह-सञ्चार-समभ्यस्त-सुपादुकः ॥
गुरुः साक्षात् परं ब्रह्म सन्-न-प्यस्मत्-कृपा-परः ।
इत्थं देही-व दृश्योऽयं ध्यानाद् विमलयेद् धियम् ॥

**आचार्य-स्वामिने नमः, ध्यायामि ॥**

*

**नमस्ते + उत ते नमः ॥ * ॥**

सर्वत्र-गं भूम-तत्त्वं स्वा·त्मना सङ्गतोऽपि यत् ।
लोक-निःश्रेयसा·र्थी त्वं राजसे शारदा-मठे ॥
सन्ततं च परिव्रज्या-व्रतेना·टसि भूतले ।
तन्वानश्·चित्त-संशुद्धिम् एहि देवे·ह मद्-गुरो ॥

**आचार्य-स्वामिने नमः, आवाहयामि ॥**

*

**या त इषुः + रुद्र मृडय ॥ * ॥**

ब्रह्म त्वं जग·दाधारः स्वे महिम्नि प्रतिष्ठितम् ।
वट-मूल-समासीनः शम्भुश्·चिन्·मुद्रयाऽन्वितः ॥
सर्वज्ञा·सनम् आरोहः कामकोष्ठे च शङ्करः ।
आस्स्व वासोऽजिन-कुशे·ष्वत्र क्लृप्तेषु भक्तितः ॥

**आचार्य-स्वामिने नमः, आसनं समर्पयामि ॥**

*

न ते ग·त्यागती सत्ये व्यापिनो,ऽथापि मादृशाम् ।
दयमानो यतेर्-देहे ज्ञानं दातु·मिहा·गतः ॥
न च त्व·दन्य ईष्टे मे परिहर्तुं गता·गतम् ।
धन्योऽहं कामकोटी·श स्वागतं वच्मि ते ततः ॥

**आचार्य-स्वामिने नमः, स्वागतं व्याहरामि । पूर्णकुम्भं समर्पयामि ॥**

न कर्मणा न प्रजया + यः परः स महेश्वरः ॥

*

**या ते रुद्र + अभिचाकशीहि ॥ * ॥**

विप्राणां राज-वर्याणां श्रेणिभिर्‌·भक्तितो नुतौ ।
त्वत्‌-पादौ निज-संस्पर्श-पवित्रित-मही-तलौ ॥
तन्‌·नेजन-जलं मन्ये संसार-व्याधि-भेषजम्‌ ।
कामको·ट्याचार्य-वर ततस्‌·ते पाद्य·मर्पये ॥

**आचार्य-स्वामिने नमः, पाद्यं समर्पयामि ॥**

*

**याम्‌ इषुं + पुरुषं जगत्‌ ॥ * ॥**

कैलासतः-समानीत-योग-लिङ्गा·भिषेचनौ ।
महात्रिपुरसुन्दर्या अर्चा-कुङ्कुम-मङ्गलौ ॥
समागतानां दीनानाम्‌ अभयं ददतौ तव ।
करा·वर्घ्य-प्रदानेन पूजयामि जगद्‌-गुरो ॥

**आचार्य-स्वामिने नमः, अर्घ्यं समर्पयामि ॥**

*

**शिवेन वचसा + सुमना असत्‌ ॥ * ॥**

जग·दाचार्य-पीठ-स्थो लोक-शिक्षा·र्थ-चेष्टितः ।
अनुष्ठान-परो नित्यम्‌ आचाम·स्यप आदरात्‌ ॥
शुद्ध्यर्थं, नित्य-शुद्धस्य तत्‌ तु ना·पेक्षितं तव ।
तथा·पि मच्‌·छुद्धये ते ददा·म्याचमनीयकम्‌ ॥

**आचार्य-स्वामिने नमः, आचमनीयं समर्पयामि ॥**

*

सर्वस्माद् मधुरं ब्रह्म वेदेषु मधु कीर्तितम् ।
सै·वा·म्बा सर्व-माधुर्य-निधिः कामे·श्वरी परा ॥
कामकोष्ठे गुरोर्·मूर्त्या प्रथते सा त्व·दात्मना ।
करण-त्रय आदध्या माधुर्यं मधुपर्कतः ॥

**आचार्य-स्वामिने नमः, मधुपर्कं समर्पयामि ॥**

*

**अध्यवोचद् + यातुधान्यः ॥ * ॥**

कम्पा-सरसि गङ्गायां हिमवन्·निर्झरो·दके ।
स्फटिका·भेषु तीर्थेषु स्फटिका·वृत-कन्धरः ॥
स्फटिकः स्वीय-चित्ते च स्फटिके·श-प्रपूजनः ।
स्नासि यत् त·दनुस्मृत्य स्नपया·म्यच्छ-वारिणा ॥

(अत्र शतरुद्रीयादिभिः मन्त्रैः अभिषेकं कुर्यात् ।)

**आचार्य-स्वामिने नमः, स्नपयामि । स्नानो·त्तरम् आचमनीयं समर्पयामि ॥**

*

**असौ यस्ताम्रो + हेड ईमहे ॥ * ॥**

ललिता-ध्यानतः शश्वत् त·दभेदं गतो भवान् ।
करुणा·रुण·माकारं तस्या· व्यञ्जन् स्वभावतः ॥
नी·रागो वसनं वस्ते रक्तं काषाय-रागतः ।
त·दर्पयामि, रागा·दि-कषायः पच्यतां मम ॥

**आचार्य-स्वामिने नमः, वस्त्रं समर्पयामि ॥**

*

**असौ यो + मृडयाति नः ॥ * ॥**

उपवीते परे तत्त्वे स्थित·स्यानुपवीतिनः ।

अद्वैत-विद्या-रसिक-बिरुदं बिभ्रतस्·तव ॥

ब्रह्मणः सूचनात् सूत्रं भव·त्युपनिषत् परा ।

तस्यास्·ते जगतां शास्तः प्रतीकं सूत्र·मर्पये ॥

**आचार्य-स्वामिने नमः, यज्ञोपवीतं समर्पयामि ॥**

*

भू-मण्डल·स्यालङ्कारे क्षेत्रे सत्यव्रता·भिधे ।

निरन्तरं शान्ति-दान्ति-भूम्नै·व समुपस्कृतः ॥

तिरस्कृता·न्या·लङ्कारो भस्म-रुद्राक्ष-मण्डितः ।

शोभसे भो· यति-श्रेष्ठ, गृह्यता·मिद·मर्पितम् ॥

**आचार्य-स्वामिने नमः, भस्मो·द्धूलनं रुद्राक्ष-मालिकां च समर्पयामि ॥**

*

**नमो अस्तु नीलग्रीवाय + अकरं नमः ॥ * ॥**

कामकोष्ठे चक्र-राजं ताटङ्कं जम्बुके·श्वरे ।

लोके षण्·मत·मद्वैतं श्रुतौ च प्रत्यतिष्ठिपः ॥

यशः-सौरभ·मेवं त्वं य·दवाप्नोः सुकर्मभिः ।

तत् स्मरन् सुरभिं गन्धं सौरभा·र्थी धियोऽर्पये ॥

**आचार्य-स्वामिने नमः, गन्धान् हरिद्रा-कुङ्कुमं च धारयामि ॥**

*

**प्रमुञ्च + भगवो वप ॥ * ॥**

लोक-रक्षार्थ-चर्यस्-त्वं व्रत·मक्षत·मास्थितः ।
अक्षर-ब्रह्म-निध्याना·वृत्ता·नेक-महाक्षरः ॥
धर्मे स्थातुं ब्रह्म वेत्तुं धैर्य·मक्षत·मिष्यते ।
यत् त·दिच्छन्·नक्षतांस्·ते मङ्गला·नर्पयेऽधुना ॥

**आचार्य-स्वामिने नमः, अक्षतान् समर्पयामि ॥**

*

**अवतत्य + सुमना भव ॥ * ॥**

अमेयं तत् कि·मपि ते सौमनस्यं, स्मिताननः ।
प्रमादिनां नोऽपराधान् सहसे यत् सहस्रशः ॥
सुमनोऽर्चन-कर्तुर्·मे तल्·लेशो यदि, लभ्यते ।
अ·प्यगम्यं सुमनसां विष्णोस्·तत् परमं पदम् ॥

(अत्र पूज्यमानस्य आचार्यस्य नामावल्या अर्चनं कुर्यात् । प्रातिस्विकनामावल्याः अनुपलब्धौ आद्याचार्याणां शिवस्य वा नामावल्या कुर्यात् ।)

## ॥ श्री-शङ्कर-भगवत्पाद-अष्टोत्तर-श-नामावलिः ॥

श्री-शङ्करा·चार्य-वर्याय नमः
श्रीमते नमः
ब्रह्म-ज्ञान-प्रदायकाय नमः
मुक्ति-प्रदायकाय नमः
अज्ञान-तिमिरा·दित्याय नमः
शिष्यो·पदेश-निरताय नमः
सुज्ञाना·म्बुधि-चन्द्रमसे नमः
भक्ता·भीष्ट-प्रदायकाय नमः
वर्णा·श्रम-प्रतिष्ठात्रे नमः
सूक्ष्म-तत्त्व-रहस्य-ज्ञाय नमः (१०)

कार्या·कार्य-प्रबोधकाय नमः
ज्ञान-मुद्रा·ञ्चित-कराय नमः
शिष्य-हृत्-ताप-हारकाय नमः
परि-व्राज्या·श्रमो-द्धर्त्रे नमः
सर्व-तन्त्र-स्वतन्त्र-धिये नमः
अद्वैत-स्थापना·चार्याय नमः
साक्षाच्·छङ्कर-रूप-भृते नमः
षण्·मत-स्थापना·चार्याय नमः
त्रयी-मार्ग-प्रकाशकाय नमः
वेद-वेदान्त-तत्त्व-ज्ञाय नमः (२०)
दुर्वादि-मत-खण्डनाय नमः
वैराग्य-निरताय नमः
शान्ताय नमः
संसारा·र्णव-तारकाय नमः
प्रसन्न-वदना·म्भोजाय नमः
परमा·र्थ-प्रकाशकाय नमः
पुराण-स्मृति-सार-ज्ञाय नमः
नित्य-तृप्ताय नमः
महते नमः
शुचये नमः (३०)

नित्या·नन्दाय नमः
नि·रातङ्काय नमः
निस्·सङ्गाय नमः
निर्मला·त्मकाय नमः
निर्·ममाय नमः
नि·रहङ्काराय नमः
विश्व-वन्द्य-पदा·म्बुजाय नमः
सत्त्व-प्रधानाय नमः
सद्-भावाय नमः
सङ्ख्या·तीत-गुणो·ज्ज्वलाय नमः (४०)
अनघाय नमः
सार-हृदयाय नमः
सुधिये नमः
सारस्वत-प्रदाय नमः
सत्या·त्मने नमः
पुण्य-शीलाय नमः
साङ्ख्य-योग-विचक्षणाय नमः
तपो-राशये नमः
महा-तेजसे नमः
गुण-त्रय-विभाग-विदे नमः (५०)

कलि-घ्नाय नमः
काल-धर्म-ज्ञाय नमः
तमो-गुण-निवारकाय नमः
भगवते नमः
भारती-जेत्रे नमः
शारदा·ह्वान-पण्डिताय नमः
धर्मा·धर्म-विभाग-ज्ञाय नमः
लक्ष्य-भेद-प्रदर्शकाय नमः
नाद-बिन्दु-कला·भिज्ञाय नमः
योगि-हृत्-पद्म-भास्कराय नमः (६०)
अती·न्द्रिय-ज्ञान-निधये नमः
नित्या·नित्य-विवेकवते नमः
चि·दानन्दाय नमः
चिन्मया·त्मने नमः
पर-काय-प्रवेश-कृते नमः
अमानुष-चरित्रा·ढ्याय नमः
क्षेम-दायिने नमः
क्षमा-कराय नमः
भव्याय नमः
भद्र-प्रदाय नमः (७०)

भूरि-महिम्ने नमः
विश्व-रञ्जकाय नमः
स्व-प्रकाशाय नमः
स·दाधाराय नमः
विश्व-बन्धवे नमः
शुभो·दयाय नमः
विशाल-कीर्तये नमः
वा·गीशाय नमः
सर्व-लोक-हितो·त्सुकाय नमः
कैलास-यात्रा-सम्प्राप्त-चन्द्रमौलि-
प्रपूजकाय नमः (८०)
काञ्च्यां श्रीचक्र-राजा·ख्य-यन्त्र–
स्थापन-दीक्षिताय नमः
श्रीचक्रा·त्मक-ताटङ्क-पोषिता·म्बा-
मनोरथाय नमः
श्री-ब्रह्म-सूत्रो·पनिषद्-भाष्या·दि-ग्रन्थ-
कल्पकाय नमः
चतुर्-दिक्-चतु·राम्नाय-प्रतिष्ठात्रे नमः
महा-मतये नमः
द्विसप्तति-मतो·च्छेत्त्रे नमः

सर्व-दिग्-विजय-प्रभवे नमः
काषाय-वसनो·पेताय नमः
भस्मो·द्धूलित-विग्रहाय नमः
ज्ञाना·त्मकै·क-दण्डा·ढ्याय नमः (९०)
कमण्डलु-लसत्-कराय नमः
व्यास-सन्दर्शन-प्रीताय नमः
भगवत्पाद-संज्ञकाय नमः
चतुष्षष्टि–कला·भिज्ञाय नमः
ब्रह्मराक्षस-मोक्ष-दाय नमः
सौन्दर्य-लहरी-मुख्य-बहु-स्तोत्र-
विधायकाय नमः
श्रीमन्·मण्डन-मिश्रा·ख्य-स्वयम्भू-
जय-सन्नुताय नमः
तोटका·चार्य-सम्पूज्याय नमः
पद्मपादा·र्चिता·ङ्घ्रिकाय नमः
हस्तामलक-योगी·न्द्र-ब्रह्म-ज्ञान-
प्रदायकाय नमः (१००)
सुरेश्वरा·दि-षट्-शिष्य-सन्न्यासा·श्रम-
दायकाय नमः
निर्·व्याज-करुणा-मूर्तये नमः
जगत्-पूज्याय नमः
जगद्-गुरवे नमः
भेरी-पटह-वाद्या·दि-राज-लक्षण-
लक्षिताय नमः
सकृत्-स्मरण-सन्तुष्टाय नमः
सर्वज्ञाय नमः
ज्ञान-दायकाय नमः (१०८)

**आचार्य-स्वामिने नमः, नाना-विध-परिमल-पत्र-पुष्पाणि समर्पयामि ॥**

*

**विज्यं धनुः + निषङ्गथिः ॥ * ॥**

भ्रामयन्ति महावेगाः संसारे काम-वासनाः ।
अतो न पारये लब्धुं काम-कोटौ स्थितं पदम् ॥
काम-कोटी·श धीरस्·त्वं लीलया ता विधूनुयाः ।

आदौ सद्-वासना दत्त्वा, धूपोऽयं तादृशोऽर्प्यते ॥

**आचार्य-स्वामिने नमः, धूपम् आघ्रापयामि ॥**

*

**या ते हेतिर्मीढुष्टम + परिब्भुज ॥ * ॥**

अज्ञाना·न्धस्य लोकस्य सद्-दृ·ष्ट्युन्मीलन-क्षमा ।

कामा·क्ष्याख्या दीपिकै·का काञ्च्या·माचार्य-संज्ञया ॥

तपो-वचन-चर्याभि·रस्म·दन्तस्·तमो-हतौ ।

शश्वत् प्रवर्तते, दीपस्·तत्-प्रतीकोऽय·माहृतः ॥

**आचार्य-स्वामिने नमः, दीपं दर्शयामि ॥**

*

**नमस्ते अस्त्वायुधाय + तव धन्वने ॥ * ॥**

जगत्-स्रष्टा जगद्-भक्षो ब्रह्म-क्षत्रौ·दनो भवान् ।

ईश्वरा·त्मतया, रूपे मानुषेऽतिमिता·शनः ॥

अथा·पि भ·क्त्युपहृतम् अश्नीया लेशतोऽपि वा ।

पूतः शेष-प्रसादश्च चित्तं पूतं करोतु मे ॥

**आचार्य-स्वामिने नमः, अमृतं महा-नैवेद्यं पानीयं च निवेदयामि । निवेदनो·त्तरम् आचमनीयं समर्पयामि ॥**

*

**परि ते धन्वनो + निधेहि तम् ॥ * ॥**

ताम्बूल-पूरित-मुखी श्रूयतेऽम्बा शिव-प्रिया ।

यतिस्·त्वं तु ततो नो ते ताम्बूलं साम्प्रतं भवेत् ॥

ज्ञानेन सुरभिर्·वाणी जीर्णा भोगाश्·च यत् तव ।
तेन तू·पचरा·म्येतद् भोगेभ्यो निर्विवृत्सया ॥
**आचार्य-स्वामिने नमः, ताम्बूलं समर्पयामि ॥**

*

सर्वज्ञ-पीठ·मारूढं सम्राजं ज्ञान-धर्मयोः ।
सुधन्वा·द्या महाराजा यन्·महा·र्हैः समार्हयन् ॥
छत्रा·दिभि·रलिप्तं त्वां तस्य मेऽस्त्वनुकारतः ।
अलिप्तता विषयेषु शमा·द्याश्च मुमुक्षुता ॥
**आचार्य-स्वामिने नमः, छत्र-चामरा·द्युपचारान् समर्पयामि ॥**

*

**नमस्ते अस्तु भगवन् + महादेवाय नमः ॥ * ॥**
**न तत्र सूर्यो भाति + सर्वमिदं विभाति ॥ * ॥**
त्वया समिध्यते सूर्यस्·त्वया भानि चकासति ।
सर्वे·श्वर त्वया चित्तं चक्षुः प्राणश्·च दीप्यते ॥
सवितासि वरेण्येन तेजसाऽखिल-दोष-हा ।
दोष-राजिं निरूढां मे जहि नीराजितो द्रुतम् ॥
**आचार्य-स्वामिने नमः, समस्ता·पराध-क्षमापणा·र्थं समस्त-दुरितो·पशा·न्त्यर्थं मङ्गल-नीराजनं दर्शयामि । रक्षां धारयामि । नीराजनो·त्तरम् आचमनीयं समर्पयामि ॥**

*

**नमो हिरण्यबाहवे हिरण्य- + नमः ॥ * ॥**

स्पर्धां त्यजत, शान्त्यैव नित्यं सुख·मिति ब्रुवन् ।
लोकानां शङ्करो भूमिं करोषि त्वं प्रदक्षिणम् ॥
अतः संसार-मोहे·ष्वावरीवृत्य सुदुःखितः ।
करोमि मनसो नित्य-शान्तये त्वां प्रदक्षिणम् ॥

**आचार्य-स्वामिने नमः, प्रदक्षिणं करोमि ॥**

*

**नमो रुद्रेभ्यो + जम्भे दधामि ॥ * ॥**

त्रयस्त्रिंशत्-कोटि-देव-सेव्या देवी हि षोडशी ।
कामकोटी पीठ-शक्तिः सर्व-मन्त्र-स्वरूपिणी ॥
सा त्वं मम गुरो, मन्त्रं किं धृष्णोमि तवा·ग्रतः ।
मातरी·व तु बालोऽहं तुष्यसी·ति धिया ब्रुवे ॥

(अत्र मन्त्रपुष्पोचितान् वेदमन्त्रान् पठेत् ।)

**आचार्य-स्वामिने नमः, मन्त्र-पुष्पं समर्पयामि ॥**

*

नन्तुर्·नन्तव्यतो भेदं दृढं व्यासेधति श्रुतिः ।
परमं सत्य·मद्वैतं यस्मात्, तत् पर·मीश्वरे ॥
गुरौ तु द्वैत·मेवे·ष्टं तद्-भक्त्या द्वैत-बाधनात् ।
न चा·न्तरा गुरुं मोक्षस्·तस्मात् तस्मै नमो नमः ॥

(अत्र श्रीमठीयबिरुदावल्या नमस्कुर्यात् । तत्र च पूज्यमानम् आचार्यं गुरुपूर्वं निर्दिशेत् ।)

**आचार्य-स्वामिने नमः, नमस्कारान् समर्पयामि ॥**

*

अनपेक्ष्य स्वीय-लाभं श्राम्य·त्यतितरां भवान् ।
अस्मद्·धिताय यत्, तेन परमोऽ·स्युपकारकः ॥
स्तुतिर्·न ·त्वनुरूपाऽस्ति तस्य काऽपि जगत्-त्रये ।
मच्·चित्त-शुद्धयेऽथा·पि गुणान् कांश्·चित् तव स्तुवे ॥

(अत्र तोटकाष्टकं पूज्यमानस्य आचार्यस्य स्तोत्रं वा पठेत् ।)

**आचार्य-स्वामिने नमः, स्तोत्रं समर्पयामि ॥**

*

**शं च मे + सुदिनं च मे ॥ * ॥**

अप्रार्थितोऽपि मद्-योग-क्षेमं वहसि य·द्यपि ।
लोक-बुद्ध्या प्रार्थनै·षा प्रसृता श्रूयतां प्रभो ॥
का·मपि प्रार्थनां नै·व प्रकुर्यां य·द्वाप्तितः ।
मह्यं प्रदेहि भगवन् स्वं रूपं मम चित्-सुखम् ॥
यावन्·मे परिपाकेन हृदयं तत्र कल्पते ।
भक्त्या धर्मेण शुश्रूषां निश्चिन्तं करवै तव ॥

(अत्र अन्या अपि शुभप्रार्थना यथायोगं कुर्यात् ।)

**आचार्य-स्वामिने नमः, प्रार्थनां समर्पयामि ॥**

*

(अत्र "गुरुर्ब्रह्मा" इत्यादिना ग्रन्थेन कामकोटिगुरुपरम्परास्मरणं कुर्यात् ।
अथ उत्तरस्मिन् जयघोषे प्रतिश्लोकार्धं "जय विजयी भव" इति योजयेत् ।)

श्री-शङ्करा·चार्य-वर्य ब्रह्म-ज्ञान-प्रदायक ।

कामकोटी·श सर्वज्ञ-पीठा·रोहण-विश्रुत ॥

सर्व-भू-देश-विप्रा·ग्र्य-महाराजा·दि-सन्नुत ।

जगद्-गुरु-पदं सार्थं कुर्वन् दीना·नुकम्पन ॥

सन्ततं जन-कल्याण-चिन्तने सक्त-मानस ।

धर्म-रक्षा·र्थ·मवनीं पर्यटन् स्मित-शोभित ॥

मृद्व्या वाचा हितं मार्गं दर्शयन् देशिको·त्तम ।

नास्तिक्य-वारण-पटो शास्त्र-मार्ग-प्ररोचक ॥

सनातनं सम्प्रदायं रक्षितुं नित्य-दीक्षित ।

कामाक्षी-करुणा-रूप प्रत्यक्ष-परमेश्वर ॥

श्रीमत्-काञ्ची-कामकोटि-सर्वज्ञ-पीठाधी·श्वर शङ्करा·चार्य स्वामिन् !

जय विजयी भव !

*

जयतु जयतु पीठी कामकोटी पुराणा

जयतु जयतु लिङ्गं चन्द्र-मौली·श-संज्ञम् ।

जयतु जयतु काञ्ची-शारदा-श्रीमठोऽयं

जयतु जयतु भूमा शङ्करा·चार्य-नामा ॥

जय जय शङ्कर हर हर शङ्कर

जय जय शङ्कर हर हर शङ्कर ।

काञ्ची-शङ्कर कामकोटि-शङ्कर

हर हर शङ्कर जय जय शङ्कर ॥

*

(कायेन वाचेत्यादि कृत्वा उत्तरेण श्लोकेन तीर्थं प्राश्नीयात् ।)

अविद्या-मूल-नाशाय जन्म-कर्म-निवृत्तये ।

ज्ञान-वैराग्य-सि·द्ध्यर्थं गुरु-पादो·दकं शुभम् ॥

* * *

## ॥ समर्पणम् ॥

श्री-कामकोटि-कृपया सदाशिव-ब्रह्म-सन्निधौ वासी ।

व्यररच·दिदं विधानं कश्·चिद् गुरु-चरण-रेणु-संसेवी ॥

गुरु-भक्तिः प्रधाने·ह संसारं सन्तितीर्षताम् ।

तस्माद् बालेन भणितम् अ·प्यादद्युर्·महाजनाः ॥

* * *